# Lakshmivishnukrita Shiva Dhyana Stuti

# લક્ષ્મીવિષ્ણૂકૃત શિવધ્યાનસ્તુતિઃ

## Document Information

Text title : Lakshmivishnukrita Shiva Dhyana Stuti

File name : lakShmIviShNUkRRitashivadhyAnastutiH.itx

Category : shiva, shivarahasya, dhyAnam, lakShmI, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | sadAshivAkhyaH navamAMshaH | adhyAyaH 22 | vAvRRittashlokAH ||

Latest update : July 14, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 14, 2024

*sanskritdocuments.org*

# લક્ષ્મીવિષ્ણૂકૃત શિવધ્યાનસ્તુતિઃ

(શિવરહસ્યાન્તર્ગતે સદાશિવાખ્યે)

અથ ધ્યાનમ્

ધ્યાયેન્નિત્યં મહાદેવં સામ્બં ચન્દ્રકલાધરમ્ ।
મૃગટઙ્કધરં સૌમ્યં લોચનત્રયભૂષિતમ્ ॥ ૧॥

નીલકણ્ઠં વિરૂપાક્ષં રત્નસિહ્માસનસ્થિતમ્ ।
ફુલ્લકલ્હારમાલાઙ્કં દિવ્યપીતામ્બરાવૃતમ્ ॥ ૨॥

અનલ્પરત્નાકલ્પેન શોભમાનં મહત્તરમ્ ।
સ્વહૃદુત્ફુલ્લપદ્મસ્થમેવં ધ્યાયન્ત્સ શઙ્કરમ્ ॥ ૩॥

અથ સ્તુતિઃ

સોમાસ્કન્દ વિભો ત્વદીયવિમલં રૂપં સુધાંશુસ્ફુર-
જ્જૂટાહિસ્ફુટમૌલિકાઞ્ચિતમણિસ્ફારાઙ્ગરાગોદ્ધતમ્ ।
ત્ર્યક્ષં સૌમ્યસુધાંશુકાન્તિવિલસત્તિર્યક્ત્રિપુણ્ડ્રાઙ્કિતં
વીક્ષેઽક્ષાદિવિદૂરગં તવ વિભો વક્ત્રં કટાક્ષોદયમ્ ॥ ૪॥

ત્વત્પાદાબ્જમરન્દસુન્દરમહાવીચીસ્ફુરન્મૌલયો
વૃન્દારદ્યુતિવૃન્દવન્દિતમહાનન્દામ્બુધારાસ્પદમ્ ।
ધ્યાયં ધ્યાયમુપાસ્મહે તવ મહાપાપૌઘભિત્કેવલં
યુક્ત્યા કિં મમ સામ્પ્રતં તવ વિભો ભક્તિં હિ યાચે સદા ॥ ૫॥

શ્રી બિલ્મિને કવચિને વરસોમધામ
સામિપ્રકામશિરસે મમ દુઃખહન્ત્રે ।
પાત્રે સમસ્તસુરતાવનદીક્ષિતાય
વલ્મીકમધ્યવિલયાય નમઃ શિવાય ॥ ૬॥

ગૌરીવિલાસમુખપઙ્કજસાનુનેત્ર-
પ્રોદ્યત્પ્રભાધવલિતાય મહેશ્વરાય ।

પ્રોદ્યત્સુધાંશુચયવાર્ધિતરઙ્ગ રિઙ્ખ-
દ્ગઙ્ગાતરઙ્ગકલિતેન્દુજટાલકાય ॥ ૭॥

ઉદ્દણ્ડચણ્ડકરધારિતમેરુમધ્ય-
કોદણ્ડકાય સતતં હરશઙ્કરાય ।
વાઞ્છી(ઞ્છે)શ તુચ્છફલદેષુ ન મે સ્પૃહા સ્યાત્
પુચ્છં ત્વમેવ શ્રુતિમૌલિગિરાં સદૈવ ।
ઇચ્છા ભવેત્તવ પદે મમ ભક્તિભાવ-
સ્ત્વચ્છાસનં કલયતો મમ કિં હિ ભોગૈઃ ॥ ૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે લક્ષ્મીવિષ્ણૂકૃત શિવધ્યાનસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । સદાશિવાખ્યઃ નવમાંશઃ । અધ્યાયઃ ૨૨ । વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . sadAshivAkhyaH navamAMshaH . adhyAyaH 22 . vAvRRittashlokAH ..

Notes:
Lakṣmī લક્ષ્મી and Viṣṇu વિષ્ણુ worship and eulogize Śiva શિવ. The place where they stayed and conducted the worship came to be known as Kamalālaya કમલાલય, and Śiva શિવ came to be known as Valmīkeshvara વલ્મીકેશ્વર.
The word dhyAyannAste has been modified to dhyAyennityaM for the ease of reading this as a standalone composition. The Śloka-s have been renumbered for benefit of the reader(s).

Proofread by Ruma Dewan

---

*Lakshmivishnukrita Shiva Dhyana Stuti*

pdf was typeset on July 14, 2024

Please send corrections to *sanskrit@cheerful.com*